This question paper contains 8+2 printed pages]

## H.P.A.S. (Main)—2011

## SANSKRIT

## Paper II

*Time : 3 Hours* *Maximum Marks :* 150

**नोट :–** केवल पाँच प्रश्नों के उत्तर दीजिए। प्रश्न संख्या 1 तथा 4 अनिवार्य हैं। सभी प्रश्नों के अंक समान हैं।

1. मुद्राराक्षस के आधार पर विशाखदत्त के राजनीतिक कौशल का परिचय दीजिए।

**अथवा**

गीतिकाव्य की दृष्टि से मेघदूत का सोदाहरण विवेचन कीजिए।

2. करुण रस के आधार पर उत्तररामचरित की विवेचना कीजिए।

**अथवा**

राजतरङ्गिणी में प्रतिपादित भारतीय संस्कृति का अथवा राजनीतिक परिस्थितियों का विवरण दीजिए।

P.T.O.

3. गौतम बुद्ध के उपदेशों के प्रचार की दृष्टि से बुद्धचरित के योगदान पर सोदाहरण प्रकाश डालिए।

अथवा

बाणभट्ट के गद्य की प्रमुख विशेषताएँ सोदाहरण प्रतिपादित कीजिए।

4. निम्नलिखित में से किन्हीं **तीन** श्लोकों की **संस्कृत** में व्याख्या कीजिए :

(क) मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।

आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥

(ख) वासांसि जीर्णानि यथा विहाय,

नवानि गृह्णाति नरोऽपराणि,

तथा शरीराणि विहाय जीर्णा-

न्यन्यानि संयाति नवानि देही॥

(ग) महतः परमव्यक्तमव्यक्तात्पुरुषः परः।

पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः॥

(घ) अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्चयत्।

अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते॥

5. निम्नलिखित में से किन्हीं तीन सूक्तियों की संस्कृत में सप्रसङ्ग व्याख्या कीजिए :

(क) वरं विरोधोऽपि समं महात्मभिः।

(ख) अर्थो हि कन्या परकीय एव।

(ग) गुणानुरोधेन विना न सत्क्रिया।

(घ) अविश्रमोऽयं लोकतन्त्राधिकारः।

(ङ) ओदकान्तं स्निग्धोजनोऽनुगन्तव्य इति श्रूयते।

(च) हितं मनोहारि च दुर्लभं वचः।

6. निम्नलिखित में से किन्हीं **तीन** श्लोकों का हिंदी या अंग्रेजी में अनुवाद कीजिए :

(क) द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।

स सौष्ठवौदार्य विशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥

(ख) व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।

प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः॥

(ग) विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम्।

व्रजन्ति शत्रूनवधूय निस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः॥

(घ) लभेत सिकतासु तैलमपि यत्नतः पीडयन्

पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।

कदाचिदपि पर्यटञ्छशविषाणमासादयेत्

न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥

(ङ) स्वायत्तमेकान्तगुणं विधात्रा

विनिर्मितं छादनमज्ञतायाः।

विशेषतः सर्वविदां समाजे

विभूषणं मौनमपण्डितानाम्॥

7. निम्नलिखित में से किन्हीं तीन श्लोकों का हिंदी या अंग्रेजी में अनुवाद कीजिए :

(क) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या

नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।

आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः

सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥

(ख) शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने

भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।

भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी

यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

(ग) भूत्वा चिराय चतुरन्तमहीसपत्नी

दौष्यन्तिमप्रतिरथं तनयं निवेश्य।

भर्त्रा तदर्पितकुटुम्बभरेण सार्धं

शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥

(घ) अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनस्-

त्वय्यस्यां कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।

सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया

भाग्यायत्तमतः परं न खलु तद् वाच्यं वधूबन्धुभिः॥

(ङ) तस्मिन्वने श्रीमति राजपत्नी प्रसूतिकालं समवेक्षमाणा।
शय्यां वितानोपहितां प्रपेदे नारीसहस्रैरभिनन्द्यमाना॥

8. निम्नलिखित में से किन्हीं तीन की सप्रसङ्ग व्याख्या कीजिए :

(क) अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य। कुसुमशरप्रहारजर्जरिते हि हृदि जलमिव गलत्युपदिष्टम्। अकारणं च भवति दुष्प्रकृतेरन्वयः श्रुतं चाविनयस्य। चन्दनप्रभवो न दहति किमनलः ? किं वा प्रशमहेतुनापि न प्रचण्डतरीभवती-वडवानलो वारिणा ? गुरुपदेशश्च नाम पुरुषाणामखिलमल-प्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरुप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः। विशेषेण राज्ञाम्। विरला हि तेषामुपदेष्टारः। प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्।

(ख) न ह्येवं विधमपरिचितमिह जगति किंचिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणसंदाननिस्पन्दीकृतापि नश्यति। उद्दामदर्पभटसहस्रोल्लासितासिलतापञ्जरविधृताप्यपक्रामति। मदजलदुर्दिनान्धकारगजघटितघनघटापरिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमनुबुध्यते। न लक्षणं प्रमाणीकरोति।

(ग) दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति। जनं गुणवन्तमपवित्रमिव न स्पृशति। उदारसत्त्वममङ्गलमिव न बहुमन्यते। सुजनमनिमित्तमिव न पश्यति। अभिजातमहिमिव लङ्घयति।

शूरं कण्टकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। विनीतं पातकिनमिवनोपसर्पति। मनस्विनमुन्मत्तमिवोपहसति। परस्परविरुद्धं चेन्द्रजालमिवदर्शयन्ती प्रकटयति जगति निजं चरितम्।

(घ) धर्माधर्मौ त्रय्यामर्थानर्थौ वार्त्तायां नयापनयौ दण्डनीत्यां बलाबले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्य क्रियावैशारद्यं च करोति।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।

आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

(ङ) मुण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः। स नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं यवमुष्टिं वा मासद्विमासान्तरं प्रकाशमश्नीयात्, गूढमिष्टमाहारम्।

वैदेहकान्तेवासिनश्चैनं समिद्धयोगैरर्चयेयुः।

शिष्याश्चास्यावेदयेयुः असौ सिद्धः सामेधिकः इति।

समेधाशास्तिभिश्चाभिगतानामङ्गविद्यया शिष्यसंज्ञाभिश्च कर्माण्यभिजनेऽवसितान्यादिशेत्–अल्पलाभम् अग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेशप्रवृत्तिज्ञानम्, इदमद्यश्वो वा भविष्यति इदं वा राजा करिष्यति इति॥